दीप्तिमन्तम् । पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम्” ॥)

किर्म्मी, स्त्री, (कॄ+कि+निपातनात् मुट् । ततो ङीष् ।) पलाशः । प्रहम् । स्वर्णपुत्तलिका । इति मेदिनी ॥ लौहपुत्तलिका । इति विश्वः ॥

किर्म्मीरः, पुं, (कॄ+गम्भीरादित्वात् ईरन् निपातनात् साधुः ।) नागरङ्गवृक्षः । राक्षसविशेषः । (यथा महाभारते ३ । ११ । २२ ।

“प्रत्युवाचाथ तद्रक्षो धर्म्मराजं युधिष्ठिरम् ।
अहं वकस्य वै भ्राता किर्म्मीर इति विश्रुतः” ॥)

कर्व्वुरवर्णः । इति मेदिनी ॥ तद्वर्णयुक्ते त्रि । इत्यमरः । १ । ५ । १७ ॥

किर्म्मीरजित्, पुं, (किर्म्मीरं जितवान् । जि+भूते क्विप् ।) भीमसेनः । इति त्रिकाण्डशेषः ॥ (किर्म्मीरवधकथा महाभारते ३ । ११ अध्याये उक्ता । तद्यथा,—

“प्रत्युवाचाथ तद्रक्षो धर्म्मराजं युधिष्ठिरम् ।
अहं वकस्य वै भ्राता किर्म्मीर इति विश्रुतः ॥
वनेऽस्मिन् काम्यके शून्ये निवसामि गतज्वरः ।
युधि निर्जित्य पुरुषानाहारं नित्यमाचरन् ॥
के यूयमभिसंप्राप्ता भक्ष्यभूता ममान्तिकम् ।
युधि निर्जित्य वः सर्व्वान् भक्षयिष्ये गतज्वरः” ॥
वैशम्पायन उवाच ।
“युधिष्ठिरस्तु तच्छ्रुत्वा वचस्तस्य दुरात्मनः ।
आचचक्षे ततः सर्व्वं गोत्रनामादि भारत !” ॥
“किर्म्मीरस्त्वब्रवीदेनं दिष्ट्या देवैरिदं मम ।
उपपादितमद्येह चिरकालान्मनोगतम् ॥
भीमसेनवधार्थं हि नित्यमभ्युद्यतायुधः ।
चरामि पृथिवीं कृत्स्नां नेनमासादयाम्यहम् ॥
सोऽयमासादितो दिष्ट्या भ्रातृहा काङ्क्षितश्चिरम् ।
अनेन हि मम भ्राता वको विनिहतः प्रियः ॥
वेत्रकीयगृहे राजन् ! ब्राह्मणच्छद्मरूपिणा ।
विद्याबलमुपाश्रित्य न ह्यस्त्यस्यौरसं बलम्” ॥
“यदि तेन पुरा सुप्तो भीमसेनो वकेन वै ।
अद्यैनं भक्षयिष्यामि पश्यतस्ते युधिष्ठिर !” ॥
“एवमुक्तस्तु धर्म्मात्मा सत्यसन्धो युधिष्ठिरः ।
नैतदस्तीति संक्रुद्धो भर्त्सयामास राक्षसम् ॥
ततो भीमो महाबाहुराक्षज्य तरसा द्रुमम् ।
दशव्याममथोद्विद्धं निष्पत्रमकरोत्तदा” ॥
“किर्म्मीरश्चापि सहसा वृक्षमुत्पाट्य पाण्डवम् ।
दण्डपाणिरिव क्रुद्धः समरे प्रत्यधावत” ॥
“तावन्योन्यं समाश्लिष्य प्रकर्षन्तौ परस्परम् ।
उभावपि चकाशेते प्रवृद्धौ वृषभाविव ॥
तयोरासीत्सुतुमुलः संप्रहारः सुदारुणः ।
नखदंष्ट्रायुधवतोर्व्याघ्रयोरिव दीप्तयोः” ॥
“तयोर्भुजविनिष्पेषादुभयोर्बलिनोस्तदा ।
शब्दः समभवद्घोरो वेणुस्फोटसमो युधि ॥
अथैनमाक्षिप्य बलाद्गृह्य मध्ये वृकोदरः ।
धूनयामास वेगेन वायुश्चण्ड इव द्रुमम् ॥
स भीमेन परामृष्टो दुर्ब्बलो बलिना रणे ।
व्यस्पन्दत यथा प्राणं विचकर्ष च पाण्डवम् ॥
तत एनं परिश्रान्तमुपलक्ष्य वृकोदरः ।
योक्त्रयामास बाहुभ्यां पशुं रसनया यथा ॥
विनदन्तं महानादं भिन्नभेरीस्वनं बली ।
भ्रामयामास सुचिरं विष्फुरन्तमचेतनम् ॥
तं विषीदन्तमाज्ञाय राक्षसं पाण्डुनन्दनः ।
प्रगृह्य तरसा दोर्भ्यां पशुमारममारयत् ॥
अथ जर्जरसर्व्वाङ्गं व्याविद्धनयनाम्बरम् ।
भूतले भ्रामयामास वाक्यञ्चेदमुवाच ह ॥
हिडिम्बवकयोः पाप ! न त्वमश्रुप्रमार्जनम् ।
करिष्यसि गतश्चापि यमस्य सदनं प्रति ॥
इत्येवमुक्त्वा पुरुषप्रवीर-
स्तं राक्षसं क्रोधपरीतचेताः ।
विस्रस्तवस्त्राभरणं स्फुरन्त-
मुद्भ्रान्तचित्तं व्यसुमुत्ससर्ज” ॥ * ॥)

किर्म्मीरत्वक् [च्] स्त्री, (किर्म्मीरा चित्रा त्वक् यस्य ।) नारङ्गवृक्षः । इति त्रिकाण्डशेषः ॥ (नारङ्गनागरङ्गशब्दयोरस्या गुणादयो बोध्याः ॥)

किर्म्मीरभित् [द्] पुं, (किर्म्मीरं राक्षसविशेषं भिन्नवान् । भिद्+क्विप् भूते ।) भीमसेनः । इति भूरिप्रयोगः ॥ (अस्य विवरणं किर्म्मीरजित्-शब्दे द्रष्टव्यम् ॥)

किर्म्मीरसूदनः, पुं, (किर्म्मीरं सूदयति हन्तीति । सूद+णिच्+ल्युः । कर्त्तृविवक्षावशात् क्वचिद् भूतार्थे वा ।) भीमसेनः । इति हेमचन्द्रः ॥ (अस्य विवरणं किर्म्मीरजिच्छब्दे द्रष्टव्यम् ॥)

किल क नुदौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क केलयति । नुदिरिति णुद औम् प्रेरणे इत्यस्य औणादिककिप्रत्यये रूपम् । इति दुर्गादासः ॥

किल श श्वैत्ये । क्रीडे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-अक०-सेट् ।) श किलति प्रासादः शिशुर्व्वा । केलिता । इति दुर्गादासः ॥

किल, व्य, (किल+कः ।) वार्त्ता । सम्भाव्यम् । इत्यमरः । ३ । ३ । २५३ ॥ निश्चयः । इति तट्टीकासारसुन्दरी ॥ (यथा शाकुन्तले १माङ्के दुष्मन्तोक्तिः ।

“इदं किलाव्याजमनोहरं वपु-
स्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति” ॥)

अनुनयार्थम् इति मेदिनी ॥

किलकिञ्चितं, क्ली, (किल अलीकेन किं ईषत् चितं रचितम् ।) हावः । शृङ्गारभावजा क्रिया । इति जटाधरः ॥ तस्य लक्षणम् ।

यथा, अलङ्कारकौस्तुभे ।
“गर्व्वाभिलाषरुदितस्मितासूयाभयक्रुधाम् ।
सङ्करीकरणं यत् स्यादुच्यते किलकिञ्चितम्” ॥

(तथा च साहित्यदर्पणे ३ । १०९ ।
“स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम् ।
साङ्कर्य्यं किलकिञ्चितमभीष्टतमसङ्गमादिजाद्धर्षात्” ॥

उदाहरणं तत्रैव यथा,—
“पाणिरोधमविरोधितवाञ्छं
भर्त्सनाश्च मधुरस्मितगर्भाः ।
कामिनः स्म कुरुते करभोरु
र्हारि शुष्करुदितञ्च सुखेऽपि” ॥)

किलकिला, स्त्री, (किल+कः । प्रकारे वीप्सायां वा द्वित्वम् । स्त्रियां टाप् ।) हर्षध्वनिः । किलकिलशब्द इति यावत् । तत्पर्य्यायः । हर्षस्वनः २ । इति त्रिकाण्डशेषः ॥

(“आसीत् किलकिलाशब्दस्तस्मिन् गच्छति पार्थिवे” । इति महाभारते १ । ६९ । ६ ॥)

किलाटः, पुं, क्षीरविकृतिः । इति जटाधरः ॥ दधिकूर्चिकातक्रकूर्चिकयोः पिण्डः । अस्य गुणाः । शीतलम् । स्निग्धत्वम् । गुरुत्वम् । गौल्यत्वम् । रुच्यत्वम् । पित्तापहत्वञ्च । इति राजनिर्घण्टः ॥ (“नष्टदुग्धस्य पक्वस्य पिण्डः प्रोक्तः किलाटकः” ॥ इति भावप्रकाशः । तथा चरके सूत्रस्थाने । २७ अध्याये ॥

“पीयूषो मोरटश्चैव किलाटा विविधाश्च ये ।
दीप्ताग्नीनामनिद्राणां सर्व्व एते सुखप्रदाः ॥
गुरवस्तर्पणा वृष्या वृंहणाः पवनापहाः” ॥

अस्योत्पत्तिविवरणं यथा भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ किलाटकः गिजिरी इति लोके ।

“अपक्वमेव यन्नष्टं क्षीरशाकं हि तत्पयः” ।
क्षीरशाकं तुषिभरा इति लोके ।
“दध्ना तक्रेण वा नष्टं दुग्धं बद्धं सुवाससा ।
द्रवभावेन सहितं तक्रपिण्डः स उच्यते ॥
नष्टदुग्धं भवन्नीरं मोरटञ्चेप्सटोऽब्रवीत् ।
पेयूषञ्च किलाटश्च क्षीरशाकं तथैव च ॥
तक्रपिण्ड इमे वृष्या वृंहणा बलवर्द्धनाः ।
गुरवः श्लेष्मला हृद्या वातपित्तविनाशनाः ॥
दीप्ताग्नीनां विनिद्राणां विदधौ चाभिपूजिताः ।
सुखशोषस्वेषादाहरक्तपित्तज्वरप्रणुत्” ॥)

किलाटी, स्त्री, (किलाट+गौरादित्वात् ङीष् ।) क्षीरविकृतिः । तत्पर्य्यायः । कूर्च्चिका २ । इति हेमचन्द्रः ॥ (कूर्च्चिकाशब्देऽस्या गुणपर्य्याया ज्ञातव्याः ॥)

किलाटी, [न्] पुं, (किलतीति । किल+कः । अट+णिनिः । ततः । किलश्चासौ आटी चेति कर्म्मधारयः । यद्वा किलमटतीति ।) वंशः । इति हारावली ॥ बाँश् इति भाषा ॥

किलासं, क्ली, (किलं वर्णं अस्यति क्षिपति विकृतिं करोति इति यावत् । किल+अस+“कर्म्मण्यण्” । ३ । २ । १ । इति अण् ।) रोगविशेषः । कुली इति भाषा । तत्पर्य्यायः । सिध्मा २ । इत्यमरः । २ । ६ । ५३ ॥ सिध्मम् ३ । इति भरतः ॥ त्वक्पुष्पम् ४ त्वक्पुष्पी ५ । इति हेमचन्द्रः ॥

(“कुष्ठैकसम्भवं श्वित्रं किलासं दारुणञ्च तत् ।
निर्द्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम् ॥
वाताद्रूक्षारुणं पित्तात्ताम्रं कमलपत्रवत् ।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु ॥
सकण्डु च क्रमाद्रक्तमांसमेदःसु चादिशेत् ।
वर्णेनैवेदृगुभयं कृच्छ्रं तच्चोत्तरोत्तरम् ॥
अशुक्लरोमाबहुलमसंसृष्टं मिथो नवम् ।
अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा” ॥